# Shri Namaskaradashaka Stotram

# શ્રીનમસ્કારદશકસ્તોત્રમ્

## Document Information

Text title : Shri Namaskaradashaka Stotram 02 17

File name : namaskAradashakastotram.itx

Category : shiva, dashaka, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-17

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીનમસ્કારદશકસ્તોત્રમ્

નમઃ શિવાભ્યાં જગદીશ્વરાભ્યાં
જગત્પતિભ્યાં જયવિગ્રહાભ્યામ્ ।
જમ્ભારિમુખ્યૈરભિવન્દિતાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧॥

નમઃ શિવાભ્યાં જટિલાલકાભ્યાં
જરામૃતિત્રાણવિચક્ષણાભ્યામ્ ।
જનાર્દનાબ્જોદ્ભવપૂજિતાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૨॥

નમઃ શિવાભ્યાં કલિનાશકૃદ્ભયાં
કારુણ્યકલ્યાણવપુર્ધરાભ્યામ્ ।
કૈલાસશૈલાખ્યનિકેતનાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૩॥

નમઃ શિવાભ્યાં વૃષવાહનાભ્યાં
વિરિઞ્ચિવિશ્વમ્ભરપૂજિતાભ્યામ્ ।
વિભૂતિપાધીરવિલોચનાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૪॥

નમઃ શિવાભ્યામતિસુન્દરાભ્યાં
અત્યન્તમાસક્તવપુર્ધરાભ્યામ્ ।
અશેષલોકૈકશિવઙ્કરાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૫॥

નમઃ શિવાભ્યાં રવિલોચનાભ્યાં
રવીન્દુવૈશ્વાનરલોચનાભ્યામ્ ।
રાકાશશિસ્તોમમુખામ્બુજાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૬॥

નમઃ શિવાભ્યાં શશિશેખરાભ્યાં
    સમસ્તસમ્પત્પરિપૂરિતાભ્યામ્ ।
સમસ્તવિદ્યાભિરુપાસિતાભ્યાં
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૭॥

નમઃ શિવાભ્યાં નયનોત્સુકાભ્યાં
    નમસ્કૃતાભીષ્ટવરપ્રદાભ્યામ્ ।
નારાયણેનાર્ચિતપાદુકાભ્યાં
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૮॥

(૯ શ્રીમચ્છઙ્કરભગવત્પાદકૃતસૌન્દર્યલહર્યામાદિમઃ શ્લોકોઽયમ્)
નમઃ શિવાભ્યાં નવયૌવનાભ્યાં
    પરસ્પરાશ્લિષ્ટવપુર્ધરાભ્યામ્ ।
નગેન્દ્રકન્યાવૃષકેતનાભ્યાં
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૯॥

નમઃ શિવાભ્યામશિવાપહાભ્યાં
    અશેષકલ્યાણવિશેષિતાભ્યામ્ ।
અસમ્ભવાભ્યાં શ્રુતિસમ્ભવાભ્યાં
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧૦॥

નમસ્કારાત્મકં સ્તોત્રં વ્યાસેન પરિકીર્તિતમ્ ।
યઃ પઠેચ્છ્રાવયેદ્ભક્ત્યા સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૧॥

॥ ઇતિ શ્રીવેદવ્યાસકૃતં નમસ્કારદશકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Namaskaradashaka Stotram*
pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*